F.Y.
March 2018

Reg. No. ....................................

Name .........................................

105

## Part - II

## SANSKRIT

Maximum : 80 Scores

Time : 2½ Hours
Cool off time : 15 Minutes

***General Instructions to Candidates :***

- There is a 'Cool off time' of 15 minutes in addition to the writing time.
- Use the 'Cool off time' to get familiar with questions and to plan your answers.
- Read the instructions carefully.
- Read the questions carefully before answering.
- Calculations, figures and graphs should be shown in the answer sheet itself.
- Give equations wherever necessary.
- Electronic devices except nonprogrammable calculators are not allowed in the Examination Hall.

**निर्देशा: –**

प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत ।

प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठत ।

प्रश्नानां वाचनाय 15 निमेषा: कल्पिता: ।

**I.** **पञ्चानां** प्रश्नानां समुचितानि उत्तराणि कोष्ठकात निर्धार्य लिखत । **(5 × 1 = 5)**

1. फलागमै: नम्रा: भवन्ति । के?

   (तरव:, सत्पुरुषा:, दुर्जना:)

2. रामायणस्य कर्ता क:?

   (वाल्मीकि:, व्यास:, भास:)

3. वाग्भटाचार्यविरचित: आयुर्वेदग्रन्थ: क:?

   (चरकसंहिता, अष्टाङ्गहृदयम्, सुश्रुतसंहिता)

4. सन्धिविश्लेषं कुरुत – 'भवितुमर्हति' ।

(भवितुम्+अर्हति, भवितुम्+मर्हति, भवितु+मर्हति)

5. 'त्वं हरं न वेत्सि' । कस्येदं वचनम्?

(वटोः, शिवस्य, पार्वत्याः)

6. राजद्वारे श्मशाने च यः तिष्ठति सः, ............. ।

(स्नेहितः, बान्धवः, पण्डितः)


7. सर्वगुरुः .............. ।

(मगणः, नगणः, यगणः)

II. 'क' विभागे प्रदत्तमाशयं पठित्वा तदाशयप्रतिपादकं श्लोकं 'ख' विभागात् उद्धृत्य लिखत । (1 × 2 = 2)

| 'क' विभाग | 'ख' विभाग |
|---|---|
| धीराः न्यायमार्गात् पदं न प्रविचलन्ति । | 1. भवन्ति नम्रास्तरवः फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।<br>अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ।। |
| | 2. निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।<br>अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।। |

III. श्रेणीं पूरयत । (1 × 4 = 4)



(1 × 4 = 4)

IV. गद्यक्रमं लिखत ।

अकिञ्चनः सन् प्रभवः स सम्पदां

त्रिलोकनाथः पितृसद्मगोचरः ।

स भीमरूपः शिव इत्युदीर्यते

न सन्ति याथार्थ्यविदः पिनाकिनः ।।

सः अकिञ्चनः सन् ........... प्रभवः, पितृसद्मगोचरः (सन्) ............., भीमरूपः (सन्)

शिव इति ............... ।

अतः पिनाकिनः .............. न सन्ति ।

(1 × 2 = 2)

V. अधोलिखितानि वाक्यानि कः कं प्रति कथयति इति उदाहरणानुसारं लिखत ।

| कथनम् | कः | कं प्रति |
|---|---|---|
| उदाः महत्तरां भिक्षां याचे । | शक्रः | कर्णम् । |
| 1. गोसहस्रं ददामि । | .......... | ....... |
| 2. मुहूर्तकं क्षीरं पिबामि, नेच्छामि । | ......... | ....... |

(1 × 6 = 6)

VI. अधः प्रदत्ताभ्यां प्रश्नाभ्याम् **एकस्य** उत्तरं लिखत ।

क) द्वौ नाटकसङ्केतौ अधिकृत्य लघुटिप्पणीं लिखत ।

1. प्रकाशम्   2. नेपथ्यम्   3. आत्मगतम्

ख) कर्णस्य दानशीलम् अधिकृत्य सूचनानुसारं **एकां** खण्डिकां लिखत ।

सूचना : महत्तरां भिक्षां याचे, महत्तरां भिक्षां भवते प्रदास्ये, गोसहस्रं ते ददामि, वाजिनां सहस्रं ददामि, वारणानां वृन्दं ददामि, कनकं ददामि, पृथ्वीं ददामि, मम देहरक्षां ददामि ।

Turn Over

VII. अध: प्रदत्ताभ्यां प्रश्नाभ्याम् **एकस्य** उत्तरं लिखत । (1 × 6 = 6)

**क)** इष्टतम: श्लोक: क: इति सकारणं लिखत ।

1. विशिखा! निशिता विरम्यतां
क्षतमेयात् स्मिमितं न मे मन: ।
पुरतो भ्रम लोकचक्र! मां
त्यज सीतामिह तां हतामहो ।।

2. नहि देहिनि शोभनं भवे-
च्चरितार्थे सति जीवितं पुन: ।
सुतरां नटने समापिते
स च रङ्गाद्विरमेत् कुशीलव: ।।

3. इयमस्तु नतिर्ममान्तिमा
दिनसाम्राज्यपते दिवस्पते ।
कनकांशुशरौघधारिणे
भवते दुष्प्रसहप्रदीप्तये ।।

**ख)** सीताया: विचारधारा: सूचनानुसारं संगृह्य लिखत ।

**सूचना** : देहिनि चरितार्थे सति जीवनं न शोभनम्, स्तिमितं मन: क्षतं न एयात्, चन्द्राय अन्त्यप्रणाम:, सूर्याय अन्त्यप्रणाम:, सन्ध्यायै अन्त्यप्रणाम:, नक्षत्रेभ्य: अन्त्यप्रणाम: ।

VIII. मञ्जूषात: क्त्वान्त-ल्यबन्त-तुमुन्नन्त-अव्ययपदानि चित्वा लिखत । (1 × 3 = 3)

(वानरा:, कृत्वा, निषेवितुम्, धारा, निश्चित्य)

IX. पेटिकात: वृत्तलक्षणं योजयित्वा लिखत । (1 × 3 = 3)

| क | ख |
|---|---|
| 1) उक्ता वसन्ततिलका | i) यदि तौ जगौ ग: । |
| 2) जतौ तु वंशस्थम् | ii) तभजा जगौ ग: । |
| 3) स्यादिन्द्रवज्रा | iii) उदीरितं जरौ । |

**X.** आशयानुसारं क्रमीकुरूत । **(1 × 3 = 3)**

| | क | | ख |
|---|---|---|---|
| 1) | ആഹാര ശുദ്ധിയിലൂടെ ശരീരത്തിനും മനസിനും ശുദ്ധി കൈവരുന്നു. | i) | शिरस: परिषेक: शीतजलेन कर्तव्य: । |
| 2) | തല കഴുകേണ്ടത് തണുത്ത വെള്ളത്തി ലാണ്. | ii) | व्यायाम: कालानुसारी शरीरानुसारी च कर्तव्य: । |
| 3) | വ്യായാമം കാലവും ശരീരവും അനുസരിച്ച് ചെയ്യേണ്ടതാണ്. | iii) | आहारशुद्धेरेव शरीरस्य मनस: च शुद्धि: सम्पद्यते । |

**XI.** अध: प्रदत्तं गद्यभागं पठित्वा रत्नाकरस्य भार्याया: च मिथ: सम्भाषणं लिखत । **(1 × 4 = 4)**

निषाद: भार्याया: समीपं गत्वा एवम् अपृच्छत् 'प्रिये, अहं पथिकानां धनप्राणापहरणं कृत्वा एव कुटुम्बम् अपालयम् । किन्तु एतत् पापकर्मण: फलं यूयम् अपि अनुभवथ वा'? तत् श्रुत्वा कुपिता भार्या एवम् अवदत् 'न न स्वेन कृतस्य कर्मण: फलं स्वेनैव भोक्तव्यं, नेतरै:' इति । भार्यादीनां प्रतिवचनं निशम्य खिन्न: निषाद: 'कष्टम्' इत्युक्त्वा तत: अगच्छत् ॥

निषाद: - ........................?

भार्या - क: प्रश्न:? उच्यताम् ।

निषाद: - ........................?

भार्या - आम् । अत:?

निषाद: - ........................?

भार्या - ........................।

निषाद: - कष्टम् ।

**XII.** अधो दत्ताभ्यां प्रश्नाभ्याम् **एकस्य** उत्तरं लिखत । **(1 × 6 = 6)**

**क)** समयवाचकशब्दान् उपयुज्य दिनचर्यापट्टिकां पूरयत ।

सच्चिन टेन्डुल्करः प्रतिदिनं सायंकाले ........... (3.30 pm) क्रीडाङ्गणं गच्छति । ........... (4.00 pm) व्यायामं करोति । ........... (4.45 pm) क्रीडाया: परिशीलनं करोति । तदनन्तरं (7.30 pm) गृहे गच्छति । ........... (7.45 pm) स्नानं करोति । ............. (8.00 pm) ध्यानं करोति । ............ (8.15 pm) भोजनं स्वीकरोति । दशवादने शेते ।

ख) आयुर्वेदरीतिमवलम्ब्य स्वदिनचर्यां सूचनानुसारं लिखत ।

**सूचना** : प्रभाते उत्तिष्ठति, शौचादीनि करोति, व्यायामं करोति, स्नानं करोति, पठति, भोजनं स्वीकरोति, विद्यालयं गच्छति, क्रीडति, सन्ध्यावन्दनं करोति, शेते ।

**XIII.** खण्डिकां पठित्वा अधो दत्तानां प्रश्नानाम् उत्तराणि लिखत । **(1 × 5 = 5)**

सुघटितस्यास्य संस्कृतव्याकरणस्य मूलभूतानि भवन्ति एतानि माहेश्वरसूत्राणि । पाणिनिः संस्कृतव्याकरणस्य मुख्याचार्यश्चाभूत् । व्याक्रियन्ते अनेन शब्दाः इति व्याकरणम् । व्याकरणमेव शब्दानुशासनम् ।

**प्रश्नः**

1. संस्कृतव्याकरणस्य मूलभूतानि भवन्ति – कानि ?
2. संस्कृतव्याकरणस्य मुख्याचार्यः कः ?
3. व्याकरणं नाम किम् ?
4. व्याकरणम् एव ................ ।
5. सुघटितस्य + ........... = सुघटितस्यास्य ।

**XIV.** कथास्तम्भं क्रमीकुरुत । **(1 × 6 = 6)**

* रामनन्त्रोच्चारणाय संप्रेर्य ते मुनयः अगच्छन् ।
* पश्चात्तापविवशः निषादः प्रत्यागत्य मुनेः पादयोः निपत्य क्षमामयाचत ।
* भार्यायाः प्रतिवचनं निशम्य निषादः नितरां खिन्नः अभवत् ।
* मन्त्रध्वनेः प्रभवस्थानम् एकं वल्मीकमिति ज्ञात्वा ते ऋषयः तदभञ्जयन् ।
* ते महर्षयः वनमध्यात् मधुरमनोहरं राममन्त्रमाकर्ण्य विस्मिताः तस्थुः ।
* ते अतितेजस्विनं कञ्चन मुनिश्रेष्ठम् अपश्यन् ।

XV. 'क' विभागस्य श्लोकांशा: 'ख' विभागात् चित्वा लिखत । (2 × 2 = 4)

| 'क' विभाग: | 'ख' विभाग: |
|---|---|
| 1. दोषेण तीव्रो विषय: कृष्णसर्पविषादपि । | i) राजाहमिति शब्दान्नो राजा भवितुमर्हति । |
| 2. अकृत्वा शत्रुसंहारम् अगत्वाखिलभूश्रियम् । | ii) क्षुधादिकृतदु:खं तु विना स्वेन न केनचित् । |
| | iii) विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम् । |

XVI. खण्डिकात: 'सूक्तीम्' उद्धृत्य लिखत । (1 × 3 = 3)

प्रथम: भोजनार्थं सूत्रिकामलभत । स: 'दीर्घसूत्री विनश्यती'ति सूक्तिं विचिन्त्य भोजनमत्यजत् । द्वितीयाय अपूप: दत्त: । 'अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषमि'त्युक्त्वा भक्षणं विहाय गत: । तृतीयाय माषवटिकां भोजनाय अयच्छत् । सोऽपि 'छिद्रेष्वनर्था: बहुलीभवन्ति' इत्युक्त्वा अनश्नन् गत: ।

XVII. भाषान्तरीकरणं कुरुत । (1 × 5 = 5)

विवेकानन्दस्य जन्मदिनं युवजनदिनत्वेन लोके सर्वत्र आघुष्यते । ईश्वरास्तित्वविषये सञ्जाता जिज्ञासा नरेन्द्रं श्रीरामकृष्णपरमहंसस्य समीपं प्रापयत् । अचिरादेव स: परमहंसस्य प्रियशिष्योऽभवत् । युवयोगी अयं चिक्कागो नगरे प्रचलिते विश्वधर्मसमारोहे भागमभजत् ।

XVIII. अलङ्कारोदाहरणं क्रमीकृत्य लिखत । (1 × 3 = 3)

| | |
|---|---|
| 1. रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम् । | फलोत्प्रेक्षा |
| 2. धूमस्तोमं तमश्शङ्के कोकीविरहशुष्मणाम् । | हेतूत्प्रेक्षा |
| 3. प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति । | वस्तूत्प्रेक्षा |

(1 × 6 = 6)

**XIX.** यथोचितं योजयत ।

| क विभागः । | ख विभागः । |
|---|---|
| a) विवेकचूडामणिः | i) कुमारनाशान् । |
| b) कुमारसम्भवम् | ii) भर्तृहरिः । |
| c) कर्णभारम् | iii) विष्णुशर्मा । |
| d) शतकत्रयम् | iv) शङ्कराचार्यः । |
| e) पञ्चतन्त्रम् | v) कालिदासः । |
| f) चिन्ताविष्टाय सीता | vi) भासः । |